# শ্রীছিন্নমস্তাহৃদযম্

{॥ শ্রীছিন্নমস্তাহৃদযম্ ॥}

শ্রীগণেশায নমঃ ।

শ্রীপার্বত্যুবাচ ।

শ্রুতং পূজাদিকং সম্যগ্ভবদ্বক্ত্রাব্জনিঃসৃতম্ ।

হৃদযং ছিন্নমস্তাযাঃ শ্রোতুমিচ্ছামি সাম্প্রতম্ ॥ ১॥

ॐ মহাদেব উবাচ ।

নাদ্যাবধি মযা প্রোক্তং কস্যাপি প্রাণবল্লভে ।

যত্ত্বযা পরিপৃষ্টোঽহং বক্ষ্যে প্রীত্যৈ তব প্রিযে ॥ ২॥

ॐ অস্য শ্রীছিন্নমস্তাহৃদযস্তোত্রমন্ত্রস্য ভৈরব ঋষিঃ ,

সম্রাট্ ছন্দঃ , ছিন্নমস্তা দেবতা , হূং বীজম্ ,

ॐ শক্তিঃ , হ্রীং কীলকং , শত্রুক্ষযকরণার্থে পাঠে বিনিযোগঃ ॥

ॐ ভৈরবঋষযে নমঃ শিরসি ।

ॐ সম্রাটছন্দসে নমো মুখে ।

ॐ ছিন্নমস্তাদেবতাযৈ নমো হৃদি ।

ॐ হূং বীজায নমো গুহ্যে ।

ॐ ॐ শক্তযে নমঃ পাদযোঃ ।

ॐ হ্রীং কীলকায নমো নাভৌ ।

Stotram Digitalized By Sanskritdocuments.org

ওঁ বিনিয়োগায নমঃ সর্বাঙ্গে ।

ইতি ঋষ্যাদিন্যাসঃ ।

ওঁ ওঁ অঙ্গুষ্ঠাভ্যাং নমঃ ।

ওঁ হূং তর্জনীভ্যাং নমঃ ।

ওঁ হ্রীং মধ্যমাভ্যাং নমঃ ।

ওঁ ঐং অনামিকাভ্যাং নমঃ ।

ওঁ ক্লীং কনিষ্ঠিকাভ্যাং নমঃ ।

ওঁ হূং করতলকরপৃষ্ঠাভ্যাং নমঃ ।

ইতি করন্যাসঃ ।

ওঁ ওঁ হৃদযায নমঃ ।

ওঁ হূং শিরসে স্বাহা ।

ওঁ হ্রীং শিখাযৈ বষট্ ।

ওঁ ঐং কবচায হুম্ ।

ওঁ ক্লীং নেত্রত্রযায বৌষট্ ।

ওঁ হূং অস্ত্রায ফট্ ।

ইতি হৃদযাদিষডঙ্গন্যাসঃ ।

রক্তাভাং রক্তকেশীং করকমললসৎকর্ত্রিকাং কালকান্তিং

বিচ্ছিন্নাত্মীযমুণ্ডাসৃগরুণবহুলোদগ্রধারাং পিবন্তীম্ ।

বিঘ্নাভ্রৌঘপ্রচণ্ডশ্বসনসমনিভাং সেবিতাং সিদ্ধসঙ্ঘৈঃ

পদ্মাক্ষীং ছিন্নমস্তাং ছলকরদিতিজচ্ছেদিনীং সংস্মরামি ॥

ইতি ধ্যানম্ ।

বন্দেঽহং ছিন্নমস্তাং তাং ছিন্নমুণ্ডধরাং পরাম্ ।
ছিন্নগ্রীবোচ্ছটাচ্ছন্নাং ক্ষৌমবস্ত্রপরিচ্ছদাম্ ॥ ২॥

সর্বদা সুরসঙ্ঘেন সেবিতাঙ্ঘ্রিসরোরুহাম্ ।
সেবে সকলসম্পত্ত্যৈ ছিন্নমস্তাং শুভপ্রদাম্ ॥ ৩॥

যজ্ঞানাং যোগযজ্ঞায যা তু জাতা যুগে যুগে ।
দানবান্তকরীং দেবীং ছিন্নমস্তাং ভজামি তাম্ ॥ ৪॥

বৈরোচনীং বরারোহাং বামদেববিবর্দ্ধিতাম্ ।
কোটিসূর্য্যপ্রভাং বন্দে বিদ্যুদ্বর্ণাক্ষিমণ্ডিতাম্ ॥ ৫॥

নিজকণ্ঠোচ্ছলদ্রক্তধারযা যা মুহুর্মুহুঃ ।
যোগিনীস্তর্পযন্ত্যুগ্রা তস্যাশ্চরণমাশ্রযে ॥ ৬॥

হূমিত্যেকাক্ষরং মন্ত্রং যদীযং যুক্তমানসঃ ।
যো জপেত্তস্য বিদ্বেষী ভস্মতাং যাতি তাং ভজে ॥ ৭॥

হূং স্বাহেতি মনুং সম্যগ্যঃ স্মরত্যর্তিমান্নরঃ ।
ছিনত্তি ছিন্নমস্তাযা তস্য বাধাং নমামি তাম্ ॥ ৮॥

যস্যাঃ কটাক্ষমাত্রেণ ক্রূরভূতাদযো দ্রুতম্ ।

দূরতঃ সম্পলায়ন্তে চ্ছিন্নমস্তাং ভজামি তাম্ ॥ ৯॥

ক্ষিতিতলপরিরক্ষাক্ষান্তরোষা সুদক্ষা
ছলযুতখলকক্ষাচ্ছেদনে ক্ষান্তিলক্ষ্যা ।
ক্ষিতিদিতিজসুপক্ষা ক্ষোণিপাক্ষয্যশিক্ষা
জয়তু জয়তু চাক্ষা চ্ছিন্নমস্তারিভক্ষা ॥ ১০॥

কলিকলুষকলানাং কর্ত্তনে কর্ত্রিহস্তা
সুরকুবলয়কাশা মন্দভানুপ্রকাশা ।
অসুরকুলকলাপত্রাসিকাঽম্লানমূর্তি
জয়তু জয়তু কালী চ্ছিন্নমস্তা করালী ॥ ১১॥

ভুবনভরণভূরিভ্রাজমানানুভাবা
ভবভববিভবানাং ভারণোদ্ভাতভূতিঃ ।
দ্বিজকুলকমলানাং ভাসিনী ভানুমূর্তি
ভবতু ভবতু বাণী চ্ছিন্নমস্তা ভবানী ॥ ১২॥

মম রিপুগণমাশু চ্ছেত্তুমুগ্রং কৃপাণং
সপদি জননি তীক্ষ্ণং ছিন্নমুণ্ডং গৃহাণ ।
ভবতু তব যশোঽলং ছিন্ধি শত্রূন্খলাম্নে
মম চ পরিদিশেষ্টং ছিন্নমস্তে ক্ষমস্ব ॥ ১৩॥

ছিন্নগ্রীবা ছিন্নমস্তা ছিন্নমুণ্ডধরাঽক্ষতা ।

ক্ষোদক্ষেমকরী স্বক্ষা ক্ষোণীশাচ্ছাদনক্ষমা ॥ ১৪॥

বৈরোচনী বরারোহা বলিদানপ্রহর্ষিতা ।

বলিপূজিতপাদাব্জা বাসুদেবপ্রপূজিতা ॥ ১৫॥

ইতি দ্বাদশনামানি চ্ছিন্নমস্তাপ্রিযাণি যঃ ।

স্মরেৎপ্রাতঃ সমুত্থায তস্য নশ্যন্তি শত্রবঃ ॥ ১৬॥

যাং স্মৃত্বা সন্তি সদ্যঃ সকলসুরগণাঃ সর্বদা সম্পদাঢ্যাঃ

শত্রূণাং সঙ্ঘমাহত্য বিশদবদনাঃ স্বস্থচিত্তাঃ শ্রযন্তি ।

তস্যাঃ সঙ্কল্পবন্তঃ সরসিজচরণাং সততং সংশ্রযন্তি সাঽঽদ্যা

শ্রীশাদিসেব্যা সুফলতু সুতরং ছিন্নমস্তা প্রশস্তা ॥ ১৭॥

ইদং হৃদযমজ্ঞাত্বা হন্তুমিচ্ছতি যো দ্বিষম্ ।

কথং তস্যাচিরং শত্রুর্নাশমেষ্যতি পার্বতি ॥ ১৮॥

যদীচ্ছেন্নাশনং শত্রোঃ শীঘ্রমেতৎপঠেন্নরঃ ।

ছিন্নমস্তা প্রসন্না হি দদাতি ফলমীপ্সিতম্ ॥ ১৯॥

শত্রুপ্রশমনং পুণ্যং সমীপ্সিতফলপ্রদম্ ।

আযুরারোগ্যদং চৈব পঠতাং পুণ্যসাধনম্ ॥ ২০॥

॥ ইতি শ্রীনন্দ্যাবর্তে মহাদেবপার্বতীসংবাদে

শ্রীছিন্নমস্তাহৃদযস্তোত্রং সম্পূর্ণম্ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Chinnamasta Hrudaya Stotram Lyrics in Bengali PDF
% File name : chhinnamastaahridayam.itx
% Category : hRidaya
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : shrInandyAvarte mahAdevapArvatIsa.nvAde
% Latest update : August 11, 2006
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.

Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website